Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Sal467
Dum8
22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sa i476 Vrtta Vivecanam

Durg Durga Pr asad.

22.

But thought nor word can seize eternal truth

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

424

दुर्गासहायविरचितं

वृत्तविवेचनम्

मङ्गलाचरणम्—

[1]गणपतिमभिवन्द्य वन्दितं निखिलसुरारिसुरर्षिमानवैः ।
परगदितमवेक्ष्य सुन्दरं हरपुरि वृत्तविवेचनं ब्रुवे ॥१॥

ग्रन्थनयः—

गणैश्च वृत्तसंख्याभिर्यतिभिर्वृत्तलक्षणम् ।
दृश्यतेऽत्र चतुर्मात्रो गणो, गुरुलघू गलौ ॥२॥

लघोर्गुरुत्वापादनम्—

संयुक्तपूर्वं सविसर्गबिन्दु गुरूदितं दीर्घमथाक्षरञ्च ।
रसंयुतह्रादिगतस्य[2] तत्त्वं विकल्पपादान्तगतस्य चापि ॥३॥

वृत्तगणाः, तेषां शुभाशुभत्वं, तद्देवताश्च—

दीर्घैर्मो, लघुभिस्त्रिभिश्च नगणः, स्यातां गलाद्यौ भयौ
सन्तोऽमी, गलमध्यगौ जरगणौ नेष्टा गलान्त्यौ सतौ ।
ग्रन्थाशीः प्रथमे, क्रमेण [3]पतयोऽप्येषां कुनाकेन्दवः
पानीयञ्च दिवाकरोऽग्निपवनव्योमाभिधाः कीर्तिताः ॥४॥

काव्यारम्भे अशुभा वर्णाः—

ङञौ झरौ षः पुलहा डठौ णः टथौ च वर्णाः कवितादिगाश्चेत् ।
स्तुत्यस्य चेष्टाः कुगणाः स्युरेवं विहाय भूभद्रसुरार्थशब्दान् ॥५॥

---

1. A, B open with the invocation, ओं श्रीगणेशाय नमः । (no ओं in B).
2. A, B corrupt; both have च्छा for ह्रा ।
3. A, B read सतयो ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गीति-आर्या-उपगीतीनां लक्षणम्—

सप्त गणा गुरुसहिताः, षष्ठो जो वा नलौ, न विषमे जः ।
पूर्वार्द्धेऽपि परार्द्धे गीतिः, सार्या तु यत्र परभागे ॥६॥[1]

पञ्च गणाः सलमा वा सनगुरुगाः, सार्धभागोऽपि ।
आर्योत्तरार्द्धतुल्यो हंसगते ! सोपगीतिः स्यात् ॥७॥

स्रग्धरालक्षणम्—

दीर्घाण्याद्यानि चत्वारि तदनुनयने षष्ठतो विश्वतोऽन्ये
द्वौ [2]तावत् षोडशाच्च प्रकटितमदने ! चान्तिमत्वं प्रयाते ।
विश्रामो यत्र [3]शैलैरगतुरगमितैश्चापि पङ्केरुहाक्षि !
च्छन्दःशास्त्रप्रवीणेष्वतिनिपुणधियः स्रग्धरामाहुरेताम् ॥८॥

मरभनययय ऽ ऽ ऽ — ऽ । ऽ — ऽ । । — । । । — । ऽ ऽ — । ऽ ऽ — । ऽ ऽ

Cf. स्रग्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ *Vr.* 3. 99 ॥

शार्दूलविक्रीडितलक्षणम्—

वर्णाश्छन्दसि यत्र सन्ति लघवस्तुर्यस्तथा सप्तमो
बाले ! पञ्चमकस्त्रयो नवमतोऽप्यष्टादशो मानिनि ! ।
एवं पञ्चदशोऽपि, यत्र विरतिः सूर्याक्षरैर्वासरै-
स्तद्वृत्तं कवयो वदन्ति रसिकाः शार्दूलविक्रीडितम् ॥९॥

मसजसततग ऽ ऽ ऽ — । । ऽ — । ऽ । — । । ऽ — ऽ ऽ । — ऽ ऽ । — ऽ

Cf. सूर्याश्वैर्मसजाः सताः सगुरवः शार्दूलविक्रीडितम् ॥ *Vr.* 3. 96 ॥

शिखरिणीलक्षणम्—

यदा पञ्चोपाद्या[4] गुरव उदिता इन्दुवदने !
ततो रुद्रादन्यौ[5] तदनु चरमस्थो निगदितः ।

---

1. A, B om. the verse number.
2. A corrupt; it reads तावत्यो डशा ।
3. A, B read शैलेरग ।
4. A, B read पञ्चोपद्या for °पञ्चोपाद्या ।
5. A, B read -दन्यो for -दन्यौ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रसज्ञैः सर्वज्ञैर् जितमदनकान्ते! स्ववपुषा
विरामो यत्राङ्गैरथ भवमितैः सा शिखरिणी[1] ॥१०॥

यमनसभलग । ऽ ऽ — ऽ ऽ ऽ — । । । — । । ऽ — ऽ । । — । ऽ

Cf. रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ *Vr.* 3, 87 ॥

मन्दाक्रान्तालक्षणम्—

यस्यामाद्या यदि युगमिता दैर्घ्यमायान्ति वर्णा
विद्युत्कान्ते ! तदनु नवमाद् द्वौ, परौ द्वादशाच्च ।
हस्तौ चान्त्यौ कृतरसनगैर्यत्र बाले! विरामो
मन्दाक्रान्तामधिकमतयस्तन्वि ! तां व्याहरन्ति ॥११॥

मभनततगग ऽ ऽ ऽ — ऽ । । — । । । — ऽ ऽ । — ऽ ऽ । — ऽ ऽ

Cf. मन्दाक्रान्ता जलधिषडगैर्मौ नतौ ताद् गुरू चेत् ॥ *Vr.* 3, 91 ॥

पृथ्वीलक्षणम्—

द्वितीयमपि षष्ठकं गुरु तथाष्टकं द्वादशं
त्रयोदशपराक्षरे विरतिगञ्च यत्रोदितम् ।
यतिर्यदि गजाक्षरैर्नवभिरिन्दुबिम्बानने !
वदन्ति रसिका बुधा मधुरवाणि ! पृथ्वीति ताम् ॥१२॥

जसजसयलग । ऽ । — । । ऽ — । ऽ । — । । ऽ — । ऽ ऽ — । ऽ

Cf. जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ *Vr.* 3, 88 ॥

हरिणीलक्षणम्—

कमलनयने ! दीर्घा यस्मिन् रसादिषुसम्मिताः
सुमुखि ! रचिता रुद्रादन्यस्तिथिप्रमितोत्तमः ।
यदि च सुभगे ! विश्रामः स्याद्रसैः कृतपर्वतैस्
तदिति हरिणीच्छन्दो[2] बाले ! वदन्ति तदा बुधाः ॥१३॥

---

1. A, B read शिखिरणी ।
2. A, B हरिणीछन्दो ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नसमरसलग ।।।—।।ऽ—ऽऽऽ—ऽ।ऽ—।।ऽ—।ऽ

Cf. रसयुगहयैर्नौ म्रौ स्लौ गो यदा हरिणी तदा ॥ *Vr.* 3. 90 ॥

नर्कुटलक्षणम्—

प्रथमकृता रसाष्टदशगो रविविश्वमिता
यदि लघवोऽथ पञ्चदशकोऽपि च षोडशकः ।
अयि मृगशाबचञ्चलकटाक्षलसन्नयने[1] !
सुमुखि ! वदन्ति नर्कुटमिदं कविमानिजनाः ॥१४॥

नजभजजलग ।।।—।ऽ।—ऽ।।—।ऽ।—।ऽ।—।ऽ

Cf. यदि भवतो नजौ भजजला गुरु नर्कुटकम् ॥ *Vr.* 3. 92 ॥

नर्कुटान्तरलक्षणम्—

प्रथमचतुष्टयं च षष्ठं यदि चाष्टमकं
दशमपराक्षरे अदीर्घत्वमुपान्त्यगते ।
सुमुखि! समेति नीलपद्मच्छदनेत्रयुगे !
परमपि नर्कुटं वदन्तीदमनन्तधियः ॥१५॥

नजरभभग ।।।—।ऽ।—ऽ।ऽ—ऽ।।—ऽ।।—ऽ

Cf. नजरभभेन गेन च स्यान्मणिकल्पलता ॥ *Vr.* 3. 86 (2) ॥

Elsewhere, this metre is known as Maṇikalpalatā (*H* 2. 263 ; *Vr.* 3. 86 (2) ; Cintāmaṇi (*Jk.* 2. 207) and Indumukhī (*Jk.* 2.207).

मालिनीलक्षणम्—

प्रथमरसमितार्णा यान्ति यत्रागुरुत्वं
दशमरविमितान्त्यो[2] पूर्णशीतांशुकान्ते !।
विरतिरपि भुजङ्गैर्वा[3]जिभिश्चातिकामे !
कविजनरसिकास्तां मालिनीमामनन्ति ॥१६॥

ननमयय ।।।—।।।—ऽऽऽ—।ऽऽ—।ऽऽ

Cf. ननमययुतेयं मालिनी भोगिलोकैः ॥ *Vr.* 3. 81 ॥

---

1. A, B corrupt; both read नयतेने ।
2. A, B corrupt; they read : दशवरमितान्त्यौ ।
3. A, B omit the *repha*.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वसन्ततिलकलक्षणम्—

बाले ! तृतीयमथ पञ्चमतस्त्रयञ्चेद्यत्राक्षरञ्च नवमं दशमं तथैव ।
एकादशान्त्यमगुरू[1]दितमिन्दुकान्ते ! छन्दो वसन्ततिलकं[2] कवयो वदन्ति ॥१७॥

तभजजगग ऽऽ।—ऽ।।—।ऽ।—।ऽ।—ऽऽ

Cf. उक्ता वसन्ततिलका तभजा जगौ गः ॥ (*Vr.* 3. 74) ॥

प्रहर्षिणीलक्षणम्—

प्रथमं द्वयं च रसतस्त्रयं तथापि चतुर्थकं च[3] दशमं ह्युपान्तिमम्[4] ।
लघुतामुपैति किल कामलालसे ! प्रकटीकृता[5] तु कविभिः प्रहर्षिणी ॥१८॥

सजसजग ।।ऽ—।ऽ।—।।ऽ—।ऽ।—ऽ

Cf. सजसा जगौ यदि तदा सुनन्दिनी ॥ *Vr.* 3. 70 (2) ॥

This is different from the well-known Praharṣiṇī (मनजरग, *cf.* म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम् । *Vr.* 3. 66). Elsewhere this metre is known by different names like Sunandinī, Kanakaprabhā etc. (See Intro., above.)

पुष्पिताग्रालक्षणम्—

प्रथममगुरुषट्कमष्टमं[6] च दशममथादितृतीयपदगतं चेत् ।
नगणजजरगा द्वितुर्यपद्गा यदि सुमुखीति वदन्ति पुष्पिताग्राम्[7] ॥१९॥

ननरय-नजजरग ।।।—।।।—ऽ।ऽ—।ऽऽ =
।।।—।ऽ।—।ऽ।—ऽ।ऽ—ऽ

Cf. अयुजि नयुगरेफतो यकारो । युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ *Vr.* 4. 10 ॥

---

1. A, B read मुरू for गुरू ।
2. A, B corrupt : A वसन्तिलकं; B वसन्ततलकं ।
3. च is missing in both A and B.
4. A, B read तथान्तिमम् , but the metre needs the reading ह्युपान्तिमम् ।
5. A, B read कृते for कृता ।
6. Haplographical omission of one म in both A and B.
7. A, B read only पुष्पिताग्रा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उपछन्दसिकलक्षणम्—

शशिमुखि ! यदि पुष्पिताग्राविरतिभवं न[1] हि दृश्यतेऽक्षरम् ।
शिशुतपनसमप्रभे[2] ! तदा इदमुपछन्दसिकं[3] प्रचक्षते ॥२०॥

ननरलग-नजजर । । । — । । । — ऽ । ऽ — । ऽ = । । । — । ऽ । — । ऽ । — ऽ । ऽ

Cf. अयुजि ननरला गुरुः, समे न्जमपरवक्त्रमिदं ततो जरौ । *Vr.* 4. 11 ॥
All other metrical texts call this metre Aparavaktra.

द्रुतपदलक्षणम् —

प्रथमतस्त्रयमनन्तविलासे ! [4]शरमितात् त्रयमथाङ्कयुगं च ।
यदि लघुत्वमुपयाति सुनेत्रे ! द्रुतपदं कविजनोदितमेतत् ॥२१॥

नभजय । । । — ऽ । । — । ऽ । — । ऽ ऽ

Cf. द्रुतपदं नभजयैः कथितं तत् । (Utpala, verse 20)

द्रुतविलम्बितलक्षणम्—

चतुरगस्थ[5]मिदं दशमान्तिमं गुरु भवेदबलेऽक्षरमुत्तमे[6] ।
यदि बुधैरुदितं कमलानने ! द्रुतविलम्बितमङ्गजितस्मरे ! ॥२२॥

नभभर । । । — ऽ । । — ऽ । । — ऽ । ऽ

Cf. द्रुतविलम्बितमाह नभौ भरौ ॥ *Vr.* 3. 48 ॥

हरिणप्लुतालक्षणम्—

सगणादपरौ सगणौ लगौ प्रथमके चरणेऽपि तृतीयके ।
यदि सा गदिता हरिणप्लुता द्रुतविलम्बितवद् द्विचतुर्थयोः ॥२३॥

सससलगु-नभभर । । ऽ — । । ऽ — । । ऽ । ऽ =
। । । — ऽ । । — ऽ । । — ऽ । ऽ

Cf. सयुगात् सलघू विषमे गुरुर्युजि नभौ च भरौ हरिणप्लुता ॥ *Vr.* 4. 8 ॥

---

1. Both A and B corrupt; they read भवनं for भवं न ।
2. A, B read -प्रभं ।
3. B has च्छ which would disturb the metre.
4. Both A, B read शरमितस्त्रय; metre and meaning require the longthening of त ।
5. A, B corrupt; they read ज for स्थ ।
6. A, B read मुत्तमैः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तोटकलक्षणम्—

प्रथमद्वयमेति चतुर्थयुगं दशमद्वयमद्रियुगं लघुताम् ।
यदि कामकलाललिते ! गदितं किल तोटकवृत्तमनङ्गरुचे! ॥२४॥

ससस।ससस।ससस।ससस

Cf. इह तोटकमम्बुधिसैः प्रथितम् ॥ *Vr.* 3. 47 ॥

प्रमिताक्षरालक्षणम्—

सगणात् परौ यदि जसौ परतः सगणो भवेदसित[1]पङ्कजभे! ।
यदि यत्र तर्हि सुधिया प्रधिया प्रमिताक्षरेति गदिता सुभगे! ॥२५॥

सजसस।ऽ।ऽ।।ऽ।ऽ

Cf. प्रमिताक्षरा सजससैरुदिता ॥ *Vr.* 3. 58 ॥

भुजङ्गप्रयातलक्षणम्—

द्वितीयद्वयं पञ्चमद्वन्द्वमष्टद्वयं रुद्रयुग्मं गुरुत्वं यदैति ।
तदा पद्मपत्रायताक्षि! प्रवीणा भुजङ्गप्रयातं तदाहुः कवीन्द्राः ॥२६॥

यययय।ऽऽ।ऽऽ।ऽऽ।ऽऽ

Cf. भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ *Vr.* 3. 53 ॥

इन्द्रवंशालक्षणम् —

कान्ते! तृतीयं[2] लघुतामुपैति चेत् षष्ठाक्षरं[3] सप्तममङ्क[4]सम्मितम् ।
सैकादशं बालकुरङ्गलोचने ! ताम् इन्द्रवंशां कथयन्ति पण्डिताः ॥२७॥

ततजर।।ऽ।।ऽ।ऽ।ऽ

Cf. स्यादिन्द्रवंशा ततजै रसंयुतैः ॥ *Vr.* 3. 46 ॥

---

1. A, B corrupt; they read भवेदस्तल ।
2. A, B have तृतीये for तृतीयं ।
3. A, B read षष्ठक्षरं for षष्ठाक्षरं ।
4. Ms. corrupt; both read मगेव for ममङ्क ।

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वंशस्थलक्षणम्—

यदा द्विवेदेष्वहिदिङ्मितान्तिमाः[1] सुवेशि ! यस्मिन् गुरवः सुलोचने! ।
वदन्ति वंशस्थमिदं पुरातना रसाभिमत्ता मृगशाबकेक्षणे ! ॥२८॥

जतजर । ऽ । — ऽ ऽ । — । ऽ । — ऽ । ऽ

Cf. जतौ तु वंशस्थमुदीरितं जरौ ॥ *Vr.* 3. 45 ॥

इन्द्रवज्त्रालक्षणम्—

आद्यं द्वितीयं च चतुर्थयुग्मं कान्तेऽष्टमं[2] चेद्दशमद्वयञ्च ।
वृत्तेऽक्षरं यत्र गुरूत्तमाङ्गि ! प्रोक्तं[3] प्रमाणैस्तदितीन्द्रवज्त्रा ॥२९॥

ततजगग ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ ऽ

Cf स्यादिन्द्रवज्त्रा यदि तौ जगौ गः ॥ *Vr.* 3. 29 ॥

उपेन्द्रवज्त्रोपजात्योर्लक्षणम्—

यदीन्द्रवज्त्राचरणादिवर्णा लघुत्वमायान्ति तदा शुभाङ्गि! ।
उपेन्द्रवज्त्रा गदितोभयोऽचेत्पादाः शुभे! यत्र तदोपजातिः ॥३०॥

जतजगग । ऽ । — ऽ ऽ । — । ऽ । — ऽ ऽ

Cf. उपेन्द्रवज्त्रा जतजास्ततो गौ ॥ *Vr.* 3. 30 ॥

Cf. अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥ *Vr.* 3. 31 ॥

आख्यानकीलक्षणम्—

साख्यानकी कामकलाविलासे! यदीन्द्रवज्त्राचरणः पुरस्तात् ।
उपेन्द्रवज्त्रासदृशास्त्रयोऽन्ये पदाङ्घ्रयः सत्कविभिर्निरुक्ता ॥३१॥

ततजगग =जतजगग ऽ ऽ । — ऽ ऽ । — । ऽ । — ऽ ऽ =
। ऽ । — ऽ ऽ । — । ऽ । — ऽ ऽ

Cf. आख्यानकी तौ जगुरू गमोजे । जतावनोजे जगुरू गुरुश्चेत् ॥ *Vr.* 4. 6 ॥

---

1. A, B corrupt; both read तान्तमाः ।
2. A corrupt; it has कान्तंष्टमं ।
3. Both A, B corrupt; they read प्रोक्तां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रथोद्धतालक्षणम्—

चेद् द्वितीयकचतुर्थपञ्चमं चाष्टमं दशमषष्ठमक्षरम् ।
यत्र सन्ति लघवः शुभानने ! तां वदन्ति कवयो रथोद्धताम् ॥३२॥

रनरलग s । s — । । । — s । s — । s

Cf. रो नराविह रथोद्धता लगौ ॥ *Vr.* 3. 38 ॥

स्वागतालक्षणम्—

यत्र रश्च नगणो भगणश्चेद् द्वौ गुरू क्रमत एव सुकान्ते ! ।
कामकेलिकुशले ! रसिकास्तां स्वागतेति कवयः कथयन्ति ॥३३॥

रनभगग s । s — । । । — s । । — s s

Cf स्वागतेति रनभाद् गुरुयुग्मम् ॥ *Vr.* 3. 39 ॥

दोधकलक्षणम्—

द्वित्रिशराङ्गगजाङ्कमितार्णा यान्ति लघुत्वमनङ्गरते ! चेत् ।
यत्र तदा विमलाङ्गि ! सुधीभिर्दोधकवृत्तमुदीरितमेतत् ॥३४॥

भभभगग s । । — s । । — s । । — s s

Cf. दोधकवृत्तमिदं भभभाद् गौ ॥ *Vr.* 3. 33 ॥

इन्दिरालक्षणम्—

यदि चतुर्थकं षष्ठसप्तमं नवममन्तिमं दीर्घमक्षरम् ।
यदि रसाक्षरैः पञ्चभिर्यतिः सुमुखि ! सोदिता गीतिरिन्दिरा ॥३५॥

नररलग । । । — s । s — s । s — । s

Cf. राजहंसी नरौ रो लगौ यतिः स्यादृतुसायकैः ॥
Mandāramaranda Campū (*Mm.*), 9. 11. (*K. M.* 52. 1895)
Indirā is a new name. Elsewhere the metre is known as Rājahaṁsī, as above, or Vibhūṣaṇā (*Vjs.* 4. 94).

औपच्छन्दसिकलक्षणम्—

तः स्यात्प्रथमे जरौ सुमध्ये[1] ! गोऽन्त्ये पूर्वतृतीयपादयोश्चेत् ।
कान्ते ! मसजाश्च गौ पराङ्घ्रेरौपच्छन्दसिकं तदा तदुक्तम् ॥३६॥

तजरग — मसजगग s s । — । s । — s । s — s =
s s s — । । s — । s । — s s

---

1. Both A, B corrupt; both read चमध्य for सुमध्ये ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Cf. ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ ग् भद्रविराड् भवेदनोजे ॥ *Vr.* 4. 4 ॥

This metre differs from the generally accepted Aupacchandasika (*cf. Vr.* 2. 12) and corresponds to the well-known Bhadravirāṭ.

वैतालीयलक्षणम्—

नगणयुगलरात्परौ लगौ तत्पश्चान्मसजगा[1] भवन्ति चेत् ।
शशिमुखि! मृगलोचने! तदा वैतालीयमुदाहरन्ति तत् ॥३७॥

ननरलग — मसजग　।।।—।।।—ऽ।ऽ—।ऽ=
ऽऽऽ—।।ऽ—।ऽ।—ऽ

This differs from the accepted Vaitālīya (*cf. Vr.* 2. 12) and corresponds to a combination of Aparavaktra and Bhadravirāṭ minus the last *guru*.

आदौ तगणो[2] जरौ पुनः पश्चान्मः सगणस्ततो जगौ ।
पूर्वापरभागयोस्तदा वैतालीयमिदं च चक्षते[3] ॥३८॥

तजर — मसजग　ऽऽ।—।ऽ।—ऽ।ऽ=
ऽऽऽ—।।ऽ—।ऽ।—ऽ

This does not correspond to any accepted metre.

शालिनीलक्षणम्—

दीर्घा वर्णाः पञ्च कान्ते ! पदाद्याः सा[4]न्त्योपान्त्यः सप्तमश्चाष्टमोऽपि ।
वेदैरश्वैर्यत्र बाले ! विरामो विद्वद्वृन्दाः[5] शालिनीमाहुरेताम् ॥३९॥

मततगग　ऽऽऽ—ऽऽ।—ऽऽ।—ऽऽ

Cf. शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥ *Vr.* 3. 34 ॥

---

1. A, B read only तत्पश्चान्मसजा; the metre and the sense require तत्पश्चान्मसजगा ।
2. A तगणौ, wrong.
3. A reads च वक्षे, which is defective. B reads च वक्षते । The original reading might have been च चक्षते or प्रचक्षते ।
4. A has only शा for ': सा' ।
5. A omits the visarga.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हंसीलक्षणम्—

यस्यामाद्या गुरव उदिता वेदा वर्णा विरतिसहिताः।
वेदैः षड्भिर्यतिरपि यदा हंसी सोक्ता सुमुखि ! कविभिः[1] ॥४०॥

मभनग s s s — s । । — । । । — s

Cf. ज्ञेया हंसी मभनगयुता । *Vr.* 3. 28 (6); *Mm.* 13. 4 ॥

चम्पकमालालक्षणम्—

द्वित्रिमितञ्चेत् सप्तमयुग्मं लाघवमम्भोजाक्षि ! समेति।
पञ्चभिरक्षैर्विश्रमते या सुन्दरि ! सोक्ता चम्पकमाला ॥४१॥

भमसग s । । — s s s — । । s — s

Cf. चम्पकमाला चेद् भमसाद् गः ॥ *Vr.* 3. 28 (4) ॥

मणिबन्धलक्षणम्—

अन्त्यविहीना सा खलु चेच्चम्पकमाला पीनकुचे ! ।
काव्यरसज्ञाः कामरुचे ! तन्मणिबन्धं संस्तुवते ॥४२॥

ममस s । । — s s s — । । s

Cf. स्यान्मणिमध्यं भान्मसयुक् ॥ *Vr.* 3.21 (1) ॥

विद्युन्माला—

दीर्घा यस्यां[2] वर्णाः सर्वे वैरामत्वं वेदैर्वेदैः ।
कामाक्रान्ते ! विद्वद्वृन्दा भाषन्ते तां विद्युन्मालाम्[3] ॥४३॥

ममगग s s s — s s s — s s

Cf. मो मो गो गो विद्युन्माला ॥ *Vr.* 3.13 ॥

---

1. A कवभिः ।
2. Both A, B corrupt; both read यस्यं for यस्यां ।
3. A, B चिद्गन्मालाम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनुष्टुब्लक्षणम्—

यत्र षष्ठं गुरु ज्ञेयं,[1] लघु सर्वत्र पञ्चमम् ।
तृतीये पूर्वचरणे षष्ठं वा लघु सुन्दरि ! ॥४४॥

द्वितीये तुर्यचरणे सप्तमं, लघु चान्ययोः ।
तदेव गुरु वा बाले ! लक्षणं तद् अनुष्टुभः : ॥४५॥

नगस्वरूपिणीलक्षणम्—

यदाद्यरामपञ्चसप्तमाक्षरं लघूदितम् ।
तदोदिता[2] सुलोचने ! नगस्वरूपिणीति सा ॥४६॥

जरलग । ऽ । — ऽ । ऽ — । ऽ

Cf. द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥

Q. by Rāmāprapanna Śāstrī in his C on the *Vr.* (Lahore, 1925), p. 71.

माणवकक्रोडलक्षणम् —

द्वित्रिरसाद्र्यक्षरकं लाघवमेत्यब्धियुगैः ।
यत्र यतिस्तद् गदितं माणवकक्रोडमिदम्[3] ॥४७॥

भतलग ऽ । । — ऽ ऽ । — । ऽ

Cf. माणवकं भात्तलगाः ॥ *Vr.* 3.15 ॥

मदलेखालक्षणम्—

यत्रादौ मगणः[4] स्यादन्त्ये सोऽप्यथ दीर्घः ।
चेदिन्दीवरनेत्रे! सा प्रोक्ता मदलेखा ॥४८॥

मसग ऽ ऽ ऽ — । । ऽ — ऽ

Cf. म्सौ गः स्यान्मदलेखा ॥ *Vr.* 3. 10 ॥

---

1. A गुरुर्ज्ञेयं ।
2. A, B ततोदिता ।
3. Both A, B read मानवक्रोडमदः ।
4. Both A, B corrupt, भगणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शशिवदनालक्षणम्—

प्रथमचतुष्कं लघु च गुरू द्वौ ।
सुमुखि! सुधीभिः शशिवदनोक्ता ॥४९॥

नय । । । — । ऽ ऽ

Cf. शशिवदना न्यौ ॥ *Vr.* 3. 8 ॥

अक्षरपङ्क्तिलक्षणम्—

चम्पकमाला यत्र समाना । विंशतिवर्णा[1] साक्षरपङ्क्तिः ॥५०॥

भगग ऽ । । — ऽ ऽ

Cf. भ्गौ गिति पङ्क्तिः ॥ *Vr.* 3.6 ॥

ग्रन्थोपसंहार :—

श्रीराममिश्रस्य सुतोऽतिविद्वान् विलासनामातिविलासकारी ।
उदारधीः सर्वजनेषु मानी तत्सूनुनायं क्रियते सुवृत्तः ॥५१॥

वर्षेऽद्रिगोनागविधौ (१८१७) दशम्यां पौषे सिते वृत्तविवेचनाख्यः ।
ग्रन्थो मया[2] चन्द्रशरैः(५१) सुपद्यैर्बद्धः[3] सतामभ्युदयाय भूयात् ॥५२॥

इति दुर्गासहायविरचितं वृत्तविवेचनं समाप्तम्[4] ॥

---

1. A, B read वर्णाः ।
2. A, B corrupt; they read ग्रन्थ मया ।
3. A, B read वृद्धः for बद्धः ।
4. B adds the post-colophonic statement : ईश्वर के मदद से गोविन्द रघुनाथ-थत्थे ने अपने बनारस-अखबार के छापेखाने में पण्डित वृन्दावन जी सारस्वत इन्केलिये वृत्तविवेचन की पोथी छापा गया । पांच सौ (५००) मिती फाल्गुन शु० १० तारीख २१ मार्च छापने वाला बेचूबकले ॥ रामभट्ट तैलंग ॥

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Sau 15 -026

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वृत्तविवेचनान्तर्गत-

वृत्तानां सूचिः

	श्लोकसंख्या		श्लोकसंख्या
अक्षरपङ्क्तिः	५०	प्रमिताक्षरा	२५
अनुष्टुप्	४४-४५	प्रहर्षिणी	१८
आख्यानकी	३१	भुजङ्गप्रयातम्	२६
आर्या	६	मणिबन्धम्	४२
इन्दिरा	३५	मदलेखा	४८
इन्द्रवंशा	२७	मन्दाक्रान्ता	११
इन्द्रवज्रा	२९	माणवकक्रीडम्	४७
उपगीतिः	७	मालिनी	१६
उपछन्दसिकम्	२०	रथोद्धता	३२
उपजातिः	३०	वंशस्थम्	२८
उपेन्द्रवज्रा	३०	वसन्ततिलकम्	१७
औपच्छन्दसिकम्	३६	विद्युन्माला	४३
गीतिः	६	वैतालीयम्	३७-३८
चम्पकमाला	४१	शशिवदना	४९
तोटकम्	२४	शार्दूलविक्रीडितम्	९
दोधकम्	३४	शालिनी	३९
द्रुतपदम्	२१	शिखरिणी	१०
द्रुतविलम्बितम्	२२	स्रग्धरा	८
नगस्वरूपिणी	४६	स्वागता	३३
नर्कुटम्	१४-१५	हंसी	४०
पुष्पिताग्रा	१९	हरिणप्लुता	२३
पृथ्वी	१२	हरिणी	१३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

VISHVESHVARANAND INDOLOGICAL JOURNAL

RESEARCH ORGAN OF THE

VISHVESHVARANAND INSTITUTE

HOSHIARPUR (Pb., India)

The **Vishveshvaranand Indological Journal** is the half-yearly research organ of the Vishveshvaranand Institute, which is issued, equinoctially, to with in March and September. It includes research papers on all subjects of Indology, *viz.*, Language-cum-Literature, Religion, Philosophy, Sociology, History and Arts-cum-Sciences. It includes sections also on Critical Editions from original manuscripts, Translations of abstruse Texts Bibliographies, Research Digests, Literary Reviews, Research News and Notes as also Greater Indian, Iranian and other connected extra-Indian studies.

Contributions :

Learned papers written in English, Sanskrit or Hindi, pertaining to research on any of the above-mentioned subjects can be considered for publication in the Journal.

Contributions should be submitted, type-written on one side of the sheet. A paper should not normally exceed 12 double-spaced typed pages with wide margins. Copies should be retained by the writers, as manuscripts submitted cannot be returned.

Contributors are requested to follow the standard system of transliteration when writing Sanskrit and other non-English words in Roman. While non-English single words or short phrases occurring along with English words in the same line should preferably be written in Roman, longer non-English passages should preferably be written in Devanāgarī.

Every contributor is given gratis 25 off-prints of his paper when published, besides a copy of the issue of the Journal containing the paper. Extra copies of off-prints may be supplied at cost, if a request is received when the paper is submitted for publication.

A limited number of off-prints of individual papers are also separately made available for sale.

Annual Subscription :

Rs. 20 or Sh. 30 or $ 5 or equivalent. 25% discount is allowed to the Members of the V. V. R. Institute Society, who are enlisted on payment of Rs. 12/- per annum or Rs. 500/- for life, to whom *Vishva Jyoti*, the Hind monthly of the Institute, is supplied free.

Advertisement Rates :

Full page	(per insertion)	Rs. 100/-
Half-page	Do	Rs. 60/-

Advertisements of academic nature only are entertained.

All correspondence should be addressed to :

THE EDITOR,
VISHVESHVARANAND INDOLOGICAL JOURNAL
VISHVESHVARANAND INSTITUTE,
P. O. Sadhu Ashram, HOSHIARPUR (Pb., India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

VISHVESHVARANAND INDOLOGICAL JOURNAL

Half-yearly Research Organ of the Vishveshvaranand Institute publishing papers on all subjects of Indology, including Language-cum-Literature, Religion, Philosophy, Sociology, History, Archaeology, Epigraphy, Greater Indian Studies and Arts-cum-Sciences

Editor : Acharya Dr. Vishva Bandhu,
M.A., Shastri, M.O.L., D.Litt. (*h.c.*), O.d'A. (Fr.)

Asst. Editor : K. V. Sarma,
M.A., B.Sc., Dip. in French, Dip. in German

OTHER JOURNALS OF THE INSTITUTE

VISHVA SAṂSKṚTAM

The Sanskrit Quarterly of the Institute for original writing in Sanskrit, publishing essays, poems, plays, short stories, travelogues and news and notes. An. Subs. Rs. 8.

VISHVA JYOTI

The Cultural and Literary Hindi Monthly of the Institute aiming at character building based on rational outlook, intellectual progressiveness and national integration. Special Numbers devoted to specific subjects like *Mahāpuruṣa*, *Sadāchār*, *Lokarājiya*, *Rashtraraksha*, *Śikṣā*, etc. also issued annually. An. Subs. Rs. 10.

V. V. R. I. NEWS BULLETIN

A six-monthly report of the research, literary and cultural activities of the Institute as also of the important happenings in the field of Indology in the different centres of learning and research in India and abroad. An. Subs. Rs. 3.

VISHVESHVARANAND INSTITUTE
Sadhu Ashram, Hoshiarpur
(Punjab, India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry